# Vakratunda Stuti by Devarshi

# વક્રતુણ્ડસ્તુતિઃ દેવર્ષિભી કૃતા

## Document Information

Text title : Vakratunda Stuti by Devarshi

File name : vakratuNDastutiHdevarShibhIkRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 32

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વક્રતુણ્ડસ્તુતિઃ દેવર્ષિભી કૃતા

શ્રીગણેશાય નમઃ ।
દેવર્ષય ઊચુઃ ।
નમસ્તે વક્રતુણ્ડાય ગજવક્ત્રાય તે નમઃ ।
એકદન્તાય દેવાય સર્વાધિપતયે નમઃ ॥ ૩૦॥

નિર્ગુણાય નિરૂપાય ચતુર્બાહુધરાય તે ।
સિંહવાહાય નાગાનાં પત્યુર્નાભૌ ધરાય ચ ॥ ૩૧॥

અનન્તાય હ્યપારાય દુર્લક્ષ્યાય નમો નમઃ ।
પાશાઙ્કુશધરાયૈવ નાગયજ્ઞોપવીતિને ॥ ૩૨॥

વરદાભયહસ્તાય સિદ્ધિબુદ્ધિવરાય ચ ।
બ્રહ્મભૂતાય ભક્તાનાં બ્રહ્મભૂયકરાય તે ॥ ૩૩॥

નમસ્તે શમ્ભુરૂપાય વિષ્ણુરૂપાય તે નમઃ ।
સૂર્યરૂપાય ધાત્રે ચ નમઃ શક્તિમયાય ચ ॥ ૩૪॥

દૈત્યદાનવરૂપાય દેવરૂપધરાય ચ ।
નમઃ પક્ષિસ્વરૂપાય શુકરૂપાય તે નમઃ ॥ ૩૫॥

ગ્રહનક્ષત્રરૂપાય લતાવૃક્ષસ્વરૂપિણે ।
પર્વતાય નમસ્તુભ્યં સરિત્સાગરરૂપિણે ॥ ૩૬॥

જલજન્તુસ્વરૂપાય સર્પરૂપાય તે નમઃ ।
વેદાધિકાશીતિલક્ષયોનિસંસ્થાય તે નમઃ ॥ ૩૭॥

ચરાચરમયાયૈવ નમો નાનાપ્રભેદિને ।
કર્માકર્મસ્વરૂપાય નમઃ ખલુ વિકર્મણે ॥ ૩૮॥

જ્ઞાનયોગાય દેવાય સ્વાત્મરૂપધરાય તે ।
સ્વસંવેદ્યસ્વરૂપાય સદા યોગમયાય તે ॥ ૩૯॥

નાનાધારપ્રધારાય શબ્દબ્રહ્મમયાય તે ।
માયારૂપાય માયાયૈ માયાહીનાય તે નમઃ ॥ ૪૦॥

માયિભ્યો મોહદાત્રે ચ સર્વકારાય તે નમઃ ।
સ્થૂલસૂક્ષ્માદિભેદાય ભેદહીનાય તે નમઃ ॥ ૪૧॥

ભેદાભેદમયાયૈવાનન્તપારાય તે નમઃ ।
ભક્તેભ્યો વરદાત્રે ચ ભક્તસંરક્ષકાય તે ॥ ૪૨॥

નમો નમઃ પરેશાયાવ્યયાય ચ નમો નમઃ ।
ગણેશાય નમસ્તુભ્યં યોગાધીશાય તે નમઃ ॥ ૪૩॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગાશ્ચ યોગિનઃ ।
નં કિં સ્તુમો ગણેશાનં વક્રતુણ્ડસ્વરૂપિણમ્ ॥ ૪૪॥

માયાદુઃખં ચ સર્વેષાં મનસિ જ્ઞાનકારકમ્ ।
બ્રહ્મ તસ્માત્તથા વક્રં જ્ઞાનહીનં બુધૈઃ સ્મૃતમ્ ॥ ૪૫॥

માયા ચ બ્રહ્મતુણ્ડં યદ્ દ્વયોર્યોગે ભવેત્પરમ્ ।
યોગશાન્તિશ્ચ સર્વેષાં યોગિનાં હૃદિ સંસ્થિતા ॥ ૪૬॥

માયાદહસ્વરૂપા તે બ્રહ્મ વક્રં સ્મૃતં મુખમ ।
ઉભયોર્યોગભાવે ત્વં વક્રતુણ્ડઃ પ્રકથ્યતે ॥ ૪૭॥

તં વક્રતુણ્ડં પશ્યામઃ સાક્ષાદ્ યોગમયં પરમ્ ।
ધન્યા વયં ગણાધ્યક્ષં સ્તુત્વા તં પ્રણતાઃ સ્તવૈઃ ॥ ૪૮॥

ધન્યં જન્મ ત્વક્ષિ ધન્યં ધન્યાઃ સમ્પદ એવ ચ ।
જ્ઞાનં ધન્યં તપશ્ચૈવ યન દૃષ્ટો ગજાનનઃ ॥ ૪૯॥

પ્રમન્નો યદિ દેવેશ યદિ દેયો વરઃ શુભઃ ।
તદા ત્વદીયપાદાબ્જે ભક્તિરસ્તુ સદા ચ નઃ ॥ ૫૦॥

પ્રાર્થયામો વરં ચૈતં યતસ્ત્વં ચિન્તિતાર્થદઃ ।
મત્સરાસુરનાશં ચ વક્રતુણ્ડ કુરુ પ્રભો ॥ ૫૧॥

જગત્સર્વં વયં ચૈવ પીડિતાસ્તેન વિઘ્નપ ।
સર્વેષામુપકારાર્થં જહિ દૈત્યં મહાબલમ્ ॥ ૫૨॥

સ્તુત્વૈવં પ્રાર્થયિત્વા તં પ્રણતાસ્તે સુરર્ષયઃ ।
તાનુત્થાપ્ય સ્વયં સાક્ષાદ્વક્રતુણ્ડ ઉવાચ હ ॥ ૫૩॥

વક્રતુણ્ડ ઉવાચ ।
ભવેત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં પરમ્ ।
ભવિષ્યતિ મહાભાગા ઇપ્સિતાર્થપ્રદં મહત્ ॥ ૫૪॥

મત્સરાસુરનાશં ચ કરિષ્યામિ સુરર્ષયઃ ।
ભવતાં ભક્તિયોગેન પ્રસન્નઃ પૂર્ણતાં ગતઃ ॥ ૫૫॥

પઞ્ચભૂતમયં સર્વં ત્રિગુણં જગદુચ્યતે ।
અષ્ટાવરણસંયુક્તં બ્રહ્માણ્ડં હિ સુરર્ષયઃ ॥ ૫૬॥

અષ્ટાવરણસંયુક્તા દેવાઃ સર્વે ચ માનવાઃ ।
નાગાશ્ચરાચરં સર્વં તસ્ય તેભ્યો ભયં નહિ ॥ ૫૭॥

અતો મત્સરદૈત્યસ્ય નાશશ્ચ કઠિનો મહાન્ ।
નથાપિ ભવતાં દેવાઃ કરિષ્યામિ પ્રિયં દ્વિજાઃ ॥ ૫૮॥

ઇતિ દેવર્ષિભી કૃતા વક્રતુણ્ડસ્તુતિઃ સમાપ્તા । ૧.૩૨

*Vakratunda Stuti by Devarshi*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*